H.S संस्कृतनिबन्धरचना

विषयः :- "भारतीयविज्ञानपरम्परा"

"उत्तरं यत् समुद्रस्य
हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम
भारती यस्य सन्ततिः ॥"

(विष्णुपुराणम्)

लोकराष्ट्राणां मध्ये प्रथमगणनीयं गणतन्त्र-जनायत्त-राष्ट्रं भवति भारतम् । विविधवर्णीयाः विविधभाषावक्तारः नानासंस्कृतिभूषिताः नानाविधि नानावेषभूषिताश्च अत्र सहोदरः भ्रातरः इव सौहार्द्येण निवसन्ति । भारतीयानां अस्माकं ईदृशस्वभावस्य वैशिष्ट्यं भारतीयानां विज्ञान-सम्पदः पोषणेनैव इति न संशयः । पुराकालादेव भारतं विश्वगुरुत्वे स्थापयितुं या विज्ञानपरम्परा आसीत् तस्याः कालातिवर्ती प्रवाहः एव अद्यतनी भारतस्य वैश्विक मुखमुद्रा इति चिन्तयामि । अस्मिन् निबन्धे तस्याः अद्वितीयायाः भारतीयविज्ञानपरम्परायाः विषये मम चिन्तान् अत्र प्रस्तोष्यामि ।

प्रपञ्चे विद्यमानानां सकलजीवजातीनां मध्ये मानवः बुद्धिकुशलतया नैपुणीनां आहरणेन तथा विज्ञानस्य स्वीकारेण संरक्षणेन संवेदनेन च उत्कृष्टतमः जीवविशेषः अस्ति। आर्जितज्ञानस्य संवेदनेन उपयोगेन च सः कालानुसारं सीमातिरिक्तं लोकयं अपि स्वीचकार। भारतीय विज्ञानं, प्रथमतया प्रपञ्चे विज्ञानस्य प्रवाहस्य प्रारंभादेव अत्युन्नतं विशालं च आसीत्। अद्यतनी सामाजिकमाध्यमादीनां पूर्वमेव भारतस्य वैज्ञानिकमहिमा विश्वव्याप्य प्रसृता आसीत्। उक्तं हि विष्णुपुराणे -

"अत्र जन्म सहस्राणां
सहस्रैरपि सत्तम!
कदाचिल्लभते जन्तुः
मानुष्यं पुण्यसञ्चयात् ॥"

इति। अर्थादयं मानवजीवनः दुर्लभं सौभाग्यं च गणयन्ति स्म अस्माकं पूर्वजाः इति। तत्रापि च स्वभावपरिपूतायां भारतभूमौ जन्मप्राप्तिः असुलभा एव वर्तते। अत्र भारतस्य महत्वं किमिति जिज्ञासायां, भारतस्य महत्वं वै सहस्रजिह्वावता अनन्तेनापि वक्तुमशक्यम्। अनादिकालात् अमरभूमिकायां अस्यां आविर्भूताः अनङ्गुली-

തിയ്യതി.................. പ്രോഗ്രാം കമ്മിറ്റി

गणनीयाः ऋषिवर्याः श्रेष्ठाः संस्कृतादि पौराणिकभाषाणां उपसेवनेन अज्ञानस्यान्धकारे पतितानां जनानां मनस्सु विज्ञानस्य दीप्तिं प्रसारयामास।

कालिदासश्रीहर्षादिभिः उपसेविता भारतीय-साहित्यपरम्परा अपि तस्मिन् कालस्य भारतस्य प्रतिच्छाया वर्तते। भारतीय इतिहासपुराणादीनां अध्ययनेन भारतीय-शास्त्रसाङ्केतिकविद्यायाः व्याप्तिं अवगच्छामः। एतेषां पौराणिकग्रन्थानां पठनाय भारतीयविज्ञानस्य अवगमनाय च विदेशेभ्यः पण्डितपामरभेदात्रते अनेके भारतं आजग्मुः। उक्तमस्ति यत् भारतीय विज्ञानस्य सम्पदः अन्वेषणं च आसीत् पौराणिकानां भारतसन्दर्शनाः इति।

भारतीय विज्ञानस्य स्वरूपं ग्रन्थेभ्यः भाषाभिः संस्कृतेभ्यश्च अवगन्तुं शक्नुमः। पुराकालादेव यदा विश्वस्य अन्यसंस्कृतयः जीवनस्य विषयेषु व्याकुलाः आसन् तदा भारतदेशः जीवनस्य व्यवस्थितरूपस्य मार्गरेखानिर्माणे लीनः आसीत्। वराहमिहिरेण आर्यभट्टेन भास्करेण च पुरा यानि तत्त्वानि आविष्कृतानि, तानि पुनराविष्कर्तुं आधुनिकशास्त्रविज्ञानिकैः बहुदूरं तर्तव्यः अस्ति। चाणक्यादि नीतिमतेभ्यः प्रवर्धिता सा परम्परा अद्यापि विश्वमानसे भारतस्य सांस्कृतिक

हस्ताक्षरैः लिखितमस्ति। परन्तु कालक्रमेण ऐतिहासिक-विषयेभ्यः परिणामभूता सा विज्ञानपरम्परा आधुनिक-लोकस्य चर्चाविषयेषु विचित्ररूपेण अथवा न्यूनतया प्रतिपादिता इति द्रष्टुं शक्नुमः।

*आधुनिकता भारतीयविज्ञानपरम्परा च।

अयं विश्वः आधुनिकवैज्ञानिकमण्डलेषु शीघ्रगामी वर्तते। आर्जितज्ञानस्य उपयोगेन मानवः उदयादुदयं यावत् नवीनसुखसौविध्यान् आविष्करोति। जीवनस्य सुगमचलनाय प्रगत्यै च तस्य बाह्यानां सुखसौविध्यानां संवर्धने सः नितरां लिप्तः वर्तते। परन्तु अत्याधुनिकतायाः यन्त्रमाध्यमानां मध्ये भूतः अपि सः आत्मसंतृप्तः नैवेति दृश्यते। शास्त्रसाङ्केतिकप्रगतीः तस्य जीवने विज्ञानस्य अपनञ्जनं स्वरूपं परिणामस्य स्वरूपमिति अकरोत्। परन्तु भारतीयविज्ञानात् तस्य पवित्रतया च प्रवर्धिताः जनाः आत्मसंतृप्तेः जीवनमार्गदर्शने अपि सक्षमाः अवर्तन्त। संस्कृतभाषायाः पुण्यपुरातनत्वस्य महिमया पोषिता भारतीयविज्ञानपरम्परा आसेतुहिमाचलं मानविकतायाः मानविकमूल्यानां च

प्रसारिणी आसीत। ~~अथ~~अर्थात् भारतीयविज्ञानपरम्परा संस्कृत-संस्कृत्योः मूल्यैः परिपुष्टा विश्वस्य मातृका अभ्यासीत। अस्मिन् अशान्तविश्वे शास्त्रोन्नमनानां मध्ये अपि मूल्यशोषणादेव अशान्तिः विराजते। उक्तं हि विष्णुपुत्रेण मनुस्मृतौ यत्

एतद्देशप्रसूतस्य
सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन्
पृथिव्यां सर्वमानवाः॥

इति। अर्थादस्मिन् परमपावनजम्बूद्वीपे प्राप्तजन्मानः मानवाः आत्मनः जन्मसाक्षात्कारात् इतरेषामपि जीवनमार्गदर्शकाः आसन्। तस्मिन् अतिपुरातने एव काले अस्माकं जन्मभूमेः गरिमा विश्वस्य कोणे कोणे अपि आदरिता आसीत् - भारतं विश्वगुरुत्वस्थाने राजमानः देशः आसीत्। तस्मिन् काले भारतस्य आत्मा संस्कृतभाषया स्पन्दते स्म। विज्ञानसम्पदः संरक्षणाय संस्कृतभाषायाः अत्युन्नतस्थानस्य वैशिष्ट्यं अनिर्वचनीयमस्ति। यतः प्रभृति वयं संस्कृतात् अस्माकं संस्कृत्याच्च दूरं गच्छामः ततः भारतस्य स्थानं सर्वोत्तमात् पतितुं आरभते। अतः भारतीयसंस्कृतेः संस्कृतभाषायाः च माध्यमेन भारतस्य

पुण्यां पुरातनीं विज्ञानपरम्परां भारतीयानां लोकजनतायाश्च शान्तजीवनाय पुनरुज्जीवयिष्यामः।

* भारतीयविज्ञानसंरक्षणं धर्मस्य पुनस्थापनाय।

पूर्वमुक्त

पूर्वं उक्तमिव आधुनिकतायाः मध्ये अपि मूल्याणां सांस्कृतिक विज्ञानाच्च एव भूमौ मानवः आत्म-संतृप्तिं आप्नोति। परन्तु पौराणिकभारते कः विशेषः आसीत भारतीयानां मूल्याधिष्ठितजीवनाय संभावयति इति चिन्तायां, सः विशेषः एवयःभारते भारतीयान् च इतरेषां विर गणनया विशिष्यते - सनातनः कालातिवर्तीच धर्मबोधः।

अनेकपात्रधारी मानवः धर्मसंरक्षणसंवर्ते कः धर्मः श्रेष्ठः कः धर्मः कालानुसारं उपगमनीयः इति संशयेन भ्रमित्वा दुःखिताः भवन्ति। अत्रैव भारतीयविज्ञानसम्पदेन प्रवर्धमानस्य धर्मबोधस्य प्रासङ्गिकता वर्तते। तत्वाचिन्ताभिः जीवनमार्गरेखाभिः ~~पश्चात्यशास्त्रादिभि~~ पथ्यतमजीवनशैलिभिः च जीवनं धर्मपालनस्य उपदेशकः तत्वान् भारतीय विज्ञानपरम्परा वर्धयति स्म। धर्मं रक्षयित्वा तेनधर्मेण रक्षिताः भूत्वा एव जीवनं सन्तुष्टं करिष्यामः इति

भारतीयविज्ञानपरम्परायाः मुख्यतत्त्वेषु अन्यतमः अस्ति। ~~मानसिक~~ जीवनस्य सुगमाय शारीरिक-मानसिक-सामाजिकस्वास्थ्यपालने ~~श्रद्धा~~ दत्तश्रद्धाः भारतीय ऋषयः आयुर्वेदादि आरोग्याधिष्ठित ग्रन्थेभ्यः भारतीय वैद्यचिकित्सां अद्यापि उपयुक्तां आगामिनि वंशावलीनां अददत्। एतेन तस्मिन् कालस्य जनानां धार्मिकतायाः प्रतिच्छाया एव वर्तते।

शास्त्र-साहित्य-तत्त्वादिभिः जीवनस्य, आगामिनिवंशावलीनां मार्गदर्शनस्य दीपशिखाः भूत्वा वैविध्यान्विता भारतीयविज्ञानपरम्परा अद्यापि भुवनं पावयति, ~~धार्मिक~~ धर्माधिष्ठितजीवनस्य प्रेरिका अपि भवति।

*उपसंहारः

अनभिज्ञाते पुराकाले कैश्चित् स्वर्गवासिभिः एषा विज्ञानपरम्परा - साहित्यस्य, धर्मस्य, शास्त्रस्य, स्वास्थ्यस्य संस्कृतेः च प्रवाहिनी - प्रवर्धिता आसीत्। परं अद्यत्वे यत्राऽहं वसामि तद् देशं अहं अनया परम्परया तथा दत्तज्ञानेन च स्वर्गं करिष्यामि इति चिन्तयामि। संस्कृतभाषां पुनरात्मसात्कृत्वा, भारतस्य विश्वगुरुत्वस्थापनेन भुवने भारतीयविज्ञानस्य

ज्ञानराशय प्रभावः पुनरासाद्यते । ज्ञानिनः सन्तः जनाः लौकिकविषयतृष्णापरिम्लानं परस्परवैरभावं परित्यक्त्वा साहोदर्येण पुनरैकीभूताः विश्वमयं प्रशान्तं विधास्यन्ति।

तदर्थं जयतु मे संस्कृतं

तेन जयतु मे भारतम् !!!

— शुभम् —